पञ्च विज्ञेयः” मनूक्ते पञ्चपणात्मके २दण्डभेदे पु० ।

**मध्यमा** स्त्री मध्य+म । १दृष्टरजस्कायां नार्य्याम् २तर्जन्यनामिकयोरन्तःस्थायामङ्गुलौ, ३पद्मादीनां कर्णिकायाम् मेदि० परादिषु मध्ये ४हृदयोत्पन्नशब्दभेदे पश्यन्तीशब्दे ४२८१पृ० दृश्यम् ५नायिकाभेदे च ।

**मध्यमेश्वर** पु० काशीस्थे शिवलिङ्गभेदे । [गणनाभेदे ।

**मध्यमाहरण** न० वीजगणितप्रसिद्धे अव्यक्तमानज्ञापके

**मध्यरात्र** पु० मध्यं रात्रेः एकदेशिस० अच्समा० । रात्रान्तत्वात् पुंस्त्वम् । निशीथे अर्द्धरात्रे हला० ।

**मध्यवर्त्तिन्** त्रि० मध्ये वर्त्तते वृत-णिनि । वादिप्रतिवादिनोरन्ययोर्वा पक्षप्रतिपक्षयोर्वाक्यादिविषयविमर्शपूर्वकं १तत्त्वनिर्णायके स्वार्थाविरोधेन परार्थसम्पादके, कार्य्यसम्पादके च २मध्यस्थे ।

**मध्यस्थ** पु० मध्ये तिष्ठति स्था-क । १मध्यवर्त्तिनि २उदासीने च । ‘माध्यस्थ्यमिष्टेऽप्यवलम्बतेऽर्थे’ इति कुमारः ।

**मध्याह्न** पु० मध्यमह्नः एक० स० टच्समा० अह्नादेशः । अह्नान्तत्वात् पुंस्त्वम् । त्रिधा विभक्तदिनस्य १द्वितीये भागे “प्रातःकालो मुहूर्त्तांस्त्रीन् सङ्गवस्तावदेव तु । मध्याह्नस्त्रिमुहूर्त्तं स्यात्” इत्युक्ते पञ्चधा विभक्तदिनस्य २तृतीये भागे च ।

**मध्वालु(क)** पु० मधुर्मधुर आलुः । (मौ आलु) मूलभेदे । स्वार्थे क । तत्रैव । [मधुकुमजाते मद्ये अमरः ।

**मध्वासव** पु० मधुना पुष्परसेन कृत आसवः शा०त० । (मौल)

**मन** पूजायां सक० गर्वे अक० भ्वा० पर० सेट् । मनति अमानीत्-अमनीत् मेनतुः ।

**मन** गर्वे अक० चु० आ० सेट् । मानयते अमीमनत् ।

**मन** बोधे तना० आ० सक० सेट् । मनुते अमनिष्ट मेने ।

**मन** बोधे दि० आ० सक० अनिट् । मन्यते । अमंस्त मेने ।

**मन** स्तुतौ अद०चु०उ०सक०सेट् । मनयति ते अममनत् त ।

**मन** पु० मन-अच् । जटामांस्याम् शब्दच० । [त्रिका० ।

**मनआप** त्रि० मन आप्नोति आप-अण् उप०स० । मनोज्ञे

**मन(ण)ऊ** पु० नील० ता० उक्ते वर्षकालीने ग्रहयोगभेदे “वक्रःशनिर्वा यदि शीघ्रखेटात् पश्चात् पुरस्तिष्ठति तुर्यदृष्ट्या । एकर्क्षसंप्रर्क्षभुवा दृशा वा पश्चन्नथौशैरधिकोनकश्चेत् । तेजो हरेत् कार्य्यपरेत्थशाली स्थिरोऽपि नाशो मन(ण)ऊः शुभो न” ।

**मनःशिला** स्त्री मनःशब्दवाच्या शिला । (मनछाल) रक्तवर्णे उपधातुभेदे “मनःशिलाविच्छुरिता निषेदुः” कुमारः । पृष० वा सलोपे पुंस्त्वमपि । “टङ्कैर्मनःशिलगुहैरिदार्य्यमाणे”ति भरतधृतवाक्यम् ।

**मनन** न० मन-ल्युट् । १अनुमाने २युक्त्या पदार्थनिर्णये च

**मनस्** न० मन्यतेऽनेन मन—करणे असुन् । १सर्वेन्द्रियप्रवर्त्तके अन्तरिन्द्रिये न्यायमतम् वेदान्तमते २सङ्कल्पविकल्पात्मकवृत्तिमदन्तःकरणे । तच्च सुखदुःखाद्याधारः “कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एव” श्रुतेः । न्यायमते तज्ज्ञानादिसाधनमिति भेदः । ३मनःशिलायाञ्च शब्दच० ।

**मनसा** स्त्री मनं मननं स्यति सो-क । आस्तीकस्य मुनेर्मातरि वासुकिभगिन्याम् जरत्कारुपत्न्यां नाम्ना जरत्कारौ जटा० ।

**मनसादेवी** स्त्री मनसा दीव्यति दिव: करणस्य कर्त्तत्वात् कर्मोपदत्वेन अण् ङीप् अलुक्स० मनसाशब्दार्थे जटा० ।

**मनसिज** पु० मनसि जायते जन-ड सप्तम्या वा अलुक् । १कामदेवे अमरः । लुकि । मनोजोऽप्यत्र । एवं चित्तजादयोऽप्यत्र ।

**मनसिशय** पु०मनसि शेते अच् अलुक्स० । कामदेवे हला० ।

**मनस्कार** पु० कृ घञ् मनसःकारोव्यापारभेदः । चित्तस्य सुखतत्परत्वे अमरः ।

**मनस्ताप** पु० मनसस्तापः । १अनुतापे २मनःपीडायाञ्च ।

**मनस्विन्** त्रि० प्रशस्तं मनोऽस्त्यस्य विनि । १प्रशस्तमनस्के । स्त्रियां ङीप् । “मनस्विनीनां प्रतिपत्तिरीदृशी” कुमारः २शरभे पु० राजनि० ।

**मनाक्** अव्य० मन-आकि । १ईषदर्थे अमरः “कुतुहलाक्रान्तमना मनागभूत्” नैषधम् । २मन्दे च मेदि० ।

**मनाका** स्त्री मन आक । हस्तिन्याम् उणादिको० ।

**मनाक्कर** न० मनाक् करोति कृ-अच् । १मल्लिकागन्धयुक्ते अगुरुभेदे शब्दच० । २ईषत्करे त्रि० ।

**मनावी(यी)** स्त्री मनोः पत्नी वा ङीप् औङ् च । मनोः पत्न्याम् । जटाधरमते ऐङ् । मनायीत्येव तदर्थे ।

**मनित** त्रि० भ्वा० मन-कर्मणि क्त । ज्ञाते ।

**मनीक** न० मन—ईक । अञ्जने उणादिको० ।

**मनीषा** स्त्री ईष-अङ् ईषा मनस ईषा शक० । बुद्धौ अमरः ।

**मनीषिन्** पु० मनीषा अस्त्यस्य इनि । १पण्डिते अमरः २बुद्धियुक्ते त्रि० ।

**मनु** स्त्री मन उ । १पृक्कायाम् (पिडिङ्गशाक) राजनि० । २मनुपत्न्याञ्च ३प्रजापतिभेदे, धर्मशास्त्रकर्त्तरि स्वाय-